श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवरवरमुनिभिरनुगृहीतं

॥ श्रीराममङ्गळम् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्रीराममङ्गळम् ॥

मङ्गळं कोसलेन्द्राय महनीयगुणाब्धये।
चक्रवर्तितनूजाय सार्वभौमाय मङ्गळम् ॥ 1 ॥

वेदवेदान्तवेद्याय मेघश्यामळमूर्तये।
पुंसां मोहनरूपाय पुण्यश्लोकाय मङ्गळम् ॥ 2 ॥

विश्वामित्रान्तरङ्गाय मिथिलानगरीपतेः।
भाग्यानां परिपाकाय भव्यरूपाय मङ्गळम् ॥ 3 ॥

पितृभक्ताय सततं भ्रातृभिः सह सीतया।
नन्दिताखिललोकाय रामभद्राय मङ्गळम् ॥ 4 ॥

त्यक्तसाकेतवासाय चित्रकूटविहारिणे।
सेव्याय सर्वयमिनां धीरोदाराय मङ्गळम् ॥ 5 ॥

सौमित्रिणा च जानक्या चापबाणासिधारिणे।
संसेव्याय सदा भक्त्या स्वामिने मम मङ्गळम् ॥ 6 ॥

दण्डकारण्यवासाय खण्डितामर शत्रवे।
गृध्रराजाय भक्ताय मुक्तिदायास्तु मङ्गळम् ॥ 7 ॥

सादरं शबरीदत्तफलमूलाभिलाषिणे।
सौलभ्यपरिपूर्णाय सत्त्वोद्रिक्ताय मङ्गळम् ॥ 8 ॥

हनुमत्समवेताय हरीशाभीष्टदायिने।
वालिप्रमथनायास्तु महाधीराय मङ्गळम् ॥ 9 ॥

sundarkidambi
prapatti dot com
sunder kidambi

श्रीमते रघुवीराय सेतूल्लङ्घितसिन्धवे।
जितराक्षसराजाय रणधीराय मङ्गळम्॥ 10॥

आसाद्य नगरीं दिव्यामभिषिक्ताय सीतया।
राजाधिराजराजाय रामभद्राय मङ्गळम्॥ 11॥

मङ्गळाशासनपरैर्मदाचार्य पुरोगमैः।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गळम्॥ 12॥

॥ इति श्रीराममङ्गळं समाप्तम्॥

sunder kidambi
prapatti dot com
sunder kidāmbi